# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१७)

३१.१०.२०११

# दकारान्ताः पुंलिङ्गाः

- दकारान्तः पुंलिङ्गः 'त्यद्' शब्दः ।
- 'सर्वादीनि सर्वनामानि' इति सर्वनामसंज्ञा ।
- सर्वाद्यन्तर्गणे त्यदादिषु अन्तर्भवति ।
- सर्व-विश्व-उभ-उभय...... त्यद्-तद्-यद्-एतद्-इदम्-अदस्-एक-द्वि-युष्मद्-अस्मद्-भवतु-किम् ।
- **त्यदाद्यत्वं पररूपत्वं च ।**
- त्यद् (सुँ) स्
- त्य अ स् ('त्यदादीनामः' - ७.२.१०२ - इति अकारः अन्तादेशः)
- त्य स् ('अतो गुणे' - ६.१.९७ - इति पररूपम्)

# ३८१. तदोः सः सावनन्त्ययोः (७.२.१०६)

- चत्वारि पदानि । तदोः, सः, सौ, अनन्त्ययोः ।
- 'त्यदादीनामः' (७.२.१०२) इत्यतः 'त्यदादीनाम्' इति अनुवर्तते ।
- त्यदादीनां तकार-दकारयोः अनन्त्ययोः सः स्यात् सौ परे ।

- त्य स्
- स्य स् ('तदोः सः सावनन्त्ययोः')
- स्यर् ('ससजुषो रुः' - ८.२.६६)
- स्यः ('खरवसानयोर्विसर्जनीयः' - ८.३.१५)

- त्य  औ
- त्यौ            ('वृद्धिरेचि' - ६.१.८८)

- त्य  (जस्) अस्
- त्य  (शी)  ई ('जसः शी' - ७.१.१७ - इति श्यादेशः)
- त्ये            ('आद्गुणः' - ६.१.८७)

- त्य  अम्
- त्यम्            ('अमि पूर्वः' - ६.१.१०७)

- त्य (शस्) अस्
- त्यास् ('प्रथमयोः पूर्वसवर्णः' - ६.१.१०२)
- त्यान् ('तस्माच्छसो नः पुंसि' - ६.१.१०३)

- त्य (टा) आ
- त्य इन ('टाङसिङसामिनात्स्याः' - ७.१.१२)
- त्येन ('आद्गुणः' - ६.१.८७)

- त्य   भ्याम्
- त्याभ्याम्   (‘सुपि च’ - ७.३.१०२)

- त्य  भिस्
- त्य  ऐस्   (‘अतो भिस ऐस्’ - ७.१.९)
- त्यैस्   (‘वृद्धिरेचि’ - ६.१.८८)
- त्यैर्
- त्यैः

- त्य (ङे) ए
- त्यस्मै ('सर्वनाम्नः स्मै' - ७.१.१४)

- त्य भ्यस्
- त्ये भ्यस् ('बहुवचने झल्येत्' - ७.३.१०३)
- त्येभ्यर् ('ससजुषो रुः' - ८.२.६६)
- त्येभ्यः ('खरवसानयोर्विसर्जनीयः' - ८.३.१५)

- त्य (ङसि) अस्
- त्यस्मात् ('ङसिङ्योः स्मात्स्मिनौ' - ७.१.१५)

- त्य (ङस्) अस्
- त्यस्य (‘टाङसिङसामिनात्स्याः’ - ७.१.१२)

- त्य ओस्
- त्ये ओस् (‘ओसि च’ - ७.३.१०४)
- त्ययोस् (‘एचोऽयवायावः’ - ६.१.७८)
- त्ययोर्
- त्ययोः

- त्य  आम्
- त्य स् आम्  (‘आमि सर्वनाम्नः सुट्’ - ७.१.५२)
- त्ये साम्  (‘बहुवचने झल्येत्’ - ७.३.१०३)
- त्येषाम्  (‘आदेशप्रत्यययोः’ - ८.३.५९)

- त्य  (ङि) इ
- त्यस्मिन्  (‘ङसिङ्योः स्मात्स्मिनौ’ - ७.१.१५)

- त्य (सुप्) सु
- त्ये सु ('बहुवचने झल्येत्' - ७.३.१०३)
- त्येषु ('आदेशप्रत्यययोः' - ८.३.५९)

- सः, तौ, ते ।
- सर्वाणि रूपाणि त्यद्-शब्दवत् ।
- परमसः, परमतौ, परमते ।
- प्राधान्ये सर्वनामकार्याणि, अन्तर्गणकार्याणि च भवन्ति ।

- द्विपर्यन्तानामेव, नेह - त्वम् ।
- 'त्यदादीनामः' इत्यत्र 'द्विपर्यन्तानामेवेष्टिः' इति वार्तिकम् । द्विपर्यन्तानामेव त्यदादिगणः इति भावः ।
- तेन 'तदोः सः सावनन्त्ययोः' इति सत्वं युष्मद्-शब्दस्य न भवति ।
- न च तकारोच्चारणसामर्थ्यादिति वाच्यम्, अतित्वम् इति गौणे चरितार्थत्वात् ।
- युष्मद्-शब्दस्य प्रक्रियायां 'त्वाहौ सौ' इति सूत्रेण 'त्व' आदेशः विधीयते । अत्र पाणिनिना तकारः उच्चारितः, तेनैव सकारादेशः न भवतीति वक्तुं शक्यम् इति भावः । (अन्यथा, प्रक्रियालाघवाय सः सकारस्यैव उच्चारणं कुर्यात्) ।

- यदि सर्वत्र तकारस्य स्थाने सकारादेशः प्राप्येत, तदैव तदुच्चारणसामर्थ्यात् न सकारादेशः इति वक्तुं शक्यम् ।
- सर्वत्र त्वादेशस्य तकारस्य स्थाने सकारादेशस्य प्राप्तिः नास्ति । 'अतियुष्मद्' इति युष्मद्-शब्दस्य गौणत्वे त्यदाद्यन्तर्गणकार्यं न प्राप्नोति । तदा तु तकारस्य श्रवणं भवत्येव । अतः तत्सामर्थ्यात् सत्वं न इति वक्तुं न शक्यते ।
- द्विपर्यन्तानामेव त्यदादिगणः । अतः तद्बहिर्भूतस्य युष्मद्-शब्दस्य विषये त्यदादिनिमित्तानि कार्याणि न भवन्ति ।

- संज्ञायां गौणत्वे च अत्व-सत्वे न ।
- ‘संज्ञोपसर्जनीभूतास्तु न सर्वादयः’ (वा) ।
- त्यद्, त्यदौ, त्यदः ।
- ‘त्यद्’ इति कस्यचन नाम ।
- अतित्यद्, अतित्यदौ, अतित्यदः ।
- त्यम् अतिक्रान्तः इति तत्पुरुषे त्यच्छब्दस्य अप्राधान्यम् ।

- यः, यौ, ये ।
- यद्-शब्दस्य सर्वासु विभक्तिषु त्यदाद्यत्वम्, पररूपम् । ततः सर्वनामकार्याणि ।

- एषः, एतौ, एते ।
- तद्-शब्दवद्रूपाणि । प्रथमैकवचने षत्वं विशेषः ।
- अन्वादेशे तु एनम्, एनौ, एनान् ।
- एनेन । एनयोः । एनयोः ।
- 'द्वितीयाटौस्स्वेनः' (२.४.३४) - इति इदम्-एतदोः अन्वादेशे एनादेशः ।

# दकारान्तः पुंलिङ्गः युष्मद्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | त्वम् | युवाम् | यूयम् |
| द्वितीयाविभक्तिः | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/वः |
| तृतीयाविभक्तिः | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थीविभक्तिः | तुभ्यम्/ते | युवाभ्याम्/वाम् | युष्मभ्यम्/वः |
| पञ्चमीविभक्तिः | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठीविभक्तिः | तव/ते | युवयोः/वाम् | युष्माकम्/वः |
| सप्तमीविभक्तिः | त्वयि | युवयोः | युष्मासु |

# दकारान्तः पुंलिङ्गः अस्मद्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | अहम् | आवाम् | वयम् |
| द्वितीयाविभक्तिः | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| तृतीयाविभक्तिः | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थीविभक्तिः | मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| पञ्चमीविभक्तिः | मत् | आवाभ्याम् | अस्मत् |
| षष्ठीविभक्तिः | मम/मे | आवयोः/नौ | अस्माकम्/नः |
| सप्तमीविभक्तिः | मयि | आवयोः | अस्मासु |